श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामानुजाष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामानुजाष्टोत्तरशतनामस्तोत्रम् ॥

श्रीरामानुजयोगीन्द्रक्षीरकैङ्कर्यशालिने।
नमो वटुकपूर्णाय महनीयगुणाब्धये॥

रामानुजः पुष्कराक्षो यतीन्द्रः करुणाकरः।
कान्तिमत्यात्मजः श्रीमान् लीलामानुषविग्रहः॥ 1 ॥

सर्वशास्त्रार्थतत्वज्ञः सर्वज्ञस्सज्जनप्रियः।
नारायणकृपापात्रं श्रीभूतपुरनायकः॥ 2 ॥

अनघो भक्तमन्दारः केशवानन्दवर्धनः।
काञ्चीपूर्णप्रियसखः प्रणतार्तिविनाशनः॥ 3 ॥

पुण्यसङ्कीर्तनः पुण्यो ब्रह्मराक्षसमोचकः।
यादवापादितापार्थ वृक्षच्छेदकुठारकः॥ 4 ॥

अमोघो लक्ष्मणमुनिः शारदाशोकनाशनः।
निरन्तरजनाज्ञान निर्मोचनविचक्षणः॥ 5 ॥

वेदान्तद्वयसारज्ञो वरदायाम्बुदायकः।
पराभिप्रायतत्त्वज्ञो यामुनाङ्गुळिमोचकः॥ 6 ॥

देवराजकृपालब्ध षड्वाक्यार्थमहोदधिः।
पूर्णार्यलब्धसन्मन्त्रश्शौरिपादाब्जषट्पदः॥ 7 ॥

त्रिदण्डधारी ब्रह्मज्ञो ब्रह्मज्ञानपरायणः।
रङ्गेशकैङ्कर्यरतो विभूतिद्वयनायकः॥ 8 ॥

गोष्ठीपूर्णकृपालब्ध मन्त्रराजप्रकाशकः।
वररङ्गानुकम्पात्त द्राविडाम्नायपारगः॥ **9** ॥

मालाधरार्यसुज्ञात द्राविडाम्नायतत्त्वधीः।
चतुस्सप्ततिशिष्याढ्यः पञ्चाचार्यपदाश्रयः॥ **10** ॥

प्रपीतविषतीर्थाम्भः प्रकटीकृतवैभवः।
प्रणतार्तिहराचार्य दत्तभिक्षैकभोजनः॥ **11** ॥

पवित्रीकृतकूरेशो भागिनेयत्रिदण्डकः।
कूरेशदाशरथ्यादि चरमार्थप्रदायकः॥ **12** ॥

रङ्गेशवेङ्कटेशादि प्रकटीकृतवैभवः।
देवराजार्चनरतो मूकमुक्तिप्रदायकः॥ **13** ॥

यज्ञमूर्तिप्रतिष्ठाता मन्त्रदो धरणीधरः।
वरदाचार्यसद्भक्तो यज्ञेशार्तिविनाशकः॥ **14** ॥

अनन्ताभीष्टफलदो विठलेन्द्रप्रपूजितः।
श्रीशैलपूर्णकरुणालब्धरामायणार्थकः॥ **15** ॥

प्रपत्तिधर्मैकरतो गोविन्दार्यप्रियानुजः।
व्याससूत्रार्थतत्त्वज्ञो बोधायनमतानुगः॥ **16** ॥

श्रीभाष्यादिमहाग्रन्थकारकः कलिनाशनः।
अद्वैतमतविच्छेत्ता विशिष्टाद्वैतपारगः॥ **17** ॥

कुरङ्गनगरीपूर्णमन्त्ररत्नोपदेशकः।
विनाशिताखिलमतश्शेषीकृतरमापतिः॥ **18** ॥

पुत्रीकृतशठारातिश्शठारात्यृणमोचकः।
भाषादत्तहयग्रीवो भाष्यकारो महायशाः॥ **19** ॥

पवित्रीकृतभूभागः कूर्मनाथप्रकाशकः।
श्रीवेङ्कटाचलाधीश शङ्खचक्रप्रदायकः॥ 20 ॥

श्रीवेङ्कटेशश्वशुरश्श्रीरमासखदेशिकः।
कृपामात्रप्रसन्नार्यो गोपिकामोक्षदायकः॥ 21 ॥

समीचीनार्यसच्छिष्यः सत्कृतो वैष्णवप्रियः।
क्रिमिकण्ठनृपध्वंसी सर्वमन्त्रमहोदधिः॥ 22 ॥

अङ्गीकृतान्ध्रपूर्णाख्यस्सालग्रामप्रतिष्ठितः।
श्रीभक्तग्रामपूर्णेशो विष्णुवर्धनरक्षकः॥ 23 ॥

बौद्धध्वान्तसहस्रांशुश्शेषरूपप्रदर्शकः।
नगरीकृतवेदाद्रिः डिल्लीश्वरसमर्चितः॥ 24 ॥

नारायणप्रतिष्ठाता सम्पत्पुत्रविमोचकः।
सम्पत्कुमारजनकस्साधुलोकशिखामणिः॥ 25 ॥

सुप्रतिष्ठितगोविन्दराजः पूर्णमनोरथः।
गोदाग्रजो दिग्विजेता गोदाभीष्टप्रपूरकः॥ 26 ॥

सर्वसंशयविच्छेत्ता विष्णुलोकप्रदायकः।
अव्याहतमहद्वर्त्मा यतिराजो जगद्गुरुः॥ 27 ॥

एवं रामानुजार्यस्य नाम्नामष्टोत्तरं शतम्।
यः पठेच्छ्रुणुयाद्वापि सर्वान् कामानवाप्नुयात्॥ 28 ॥

यदान्ध्रपूर्णेन महात्मनेदं स्तोत्रं कृतं सर्वजनावनाय।
तज्जीवभूतं भुवि वैष्णवानां बभूव रामानुजमानसानाम्॥ 29 ॥

॥ इति श्रीरामानुजाष्टोत्तरशतनामस्तोत्रं समाप्तम्॥